## कारे सत्यागदस्य। (७०/१००७)

कारशब्द उत्तरपदे सत्य अगद इत्येतयोर्मुमागमो भवति। सत्यं करोति, सत्यस्य वा कारः सत्यङ्कारः। एवम्–अगदङ्कारः।

[७४४] [1]अस्तुसत्यागदस्य कार इति वक्तव्यम्।(म. भा. ३. १६७)

अस्तुङ्कारः।

[७४५] भक्षस्य छन्दसि कारे मुम् वक्तव्यः। (म. भा. ३. १६७)

भक्षं करोति, भक्षस्य वा कारः भक्षङ्कारः (मै.सं. ४.७.३)। छन्दसि इति किम्? भक्षकारः।

[७४६] धेनोर्भव्यायां मुम् वक्तव्यः। (म.भा.३. १६७)

'धेनुम्भव्या[2]'। (मै. सं. ४. ४. ८)

[७४७] लोकस्य पृणे मुम् वक्तव्यः। (म. भा. ३. १६७)

'लोकम्पृणः' (तै.सं. ५.७.५.६)।

[७४८] इत्येऽनभ्याशस्य मुम् वक्तव्यः। (म.भा· ३. १६८)

अनभ्याशमित्यः।

[७४९] भ्राष्ट्राग्न्योरिन्धे मुम् वक्तव्यः। (म. भा. ३. १६८)

भ्राष्ट्रमिन्धः। 'अग्निमिन्धः' (ऋ. १.१६२.५)।

[७५०] गिलेऽगिलस्य मुम् वक्तव्यः। (म.भा. ३. १६८)

तिमिङ्गिलः। अगिलस्य इति किम्? गिलगिलः।

[७५१] गिलगिले चेति वक्तव्यम्। (म.भा. ३. १६८)

तिमिङ्गिलगिलः।

[७५२] उष्णभद्रयोः करणे मुम् वक्तव्यः। (म. भा. ३. १६८)

उष्णङ्करणम्। भद्रङ्करणम्।

[७५३] सूतोग्रराजभोजमेर्वित्येतेभ्य उत्तरस्य दुहितृशब्दस्य पुत्रडादेशो वा वक्तव्यः। (म.भा. ३.१६८)

सूतपुत्री, सूतदुहिता। उग्रपुत्री. उग्रदुहिता। राजपुत्री, राजदुहिता। भोजपुत्री, भोजदुहिता। मेरुपुत्री, मेरुदुहिता। केचित्तु शार्ङ्गरवादिषु पुत्रशब्दं पठन्ति, तेषां पुत्री इति भवति। अन्यत्रापि हि दृश्यते शैलपुत्री इति॥

---

1. सत्यागदस्य नास्ति फ. 2. इति इत्यधिकम् फ.